# About Benedict (Baruch) Spinoza

# स्पिनोजादर्शनम्

## Document Information

Text title : About Benedict (Baruch) Spinoza

File name : spinojAdarshanam.itx

Category : misc, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : June 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 27, 2022

*sanskritdocuments.org*

About Benedict (Baruch) Spinoza

# स्पिनोजादर्शनम्

लेखकः - नन्दप्रदीप्तकुमारः

देशः कालः परिचयश्च-

महानुभावस्य बुद्धिवादिनो दार्शनिक-स्पिनोजा-महाभागस्य जन्म १६३२ खीष्टाब्दे नभेम्बरमासस्य चतुर्विंशतिदिनांके हलाण्डदेशस्य "एमस्टरडम" इत्यस्मिन् स्थाने बभूव । अस्य पित्रोः परिचयः नोपलभ्यते । षष्ठे वयसि तस्मिन् मातृवियोगो द्वाविंशतितमे पितृवियोगश्च संजातः । स्पिनोजा Amsterdam इत्यत्र इह्रदिविद्यालये अधीतवान् । इह्रदिधर्मे साहित्ये च तस्य परमा निष्ठा आसीत् । न केवलं इह्रदीभाषायामपितु लाटिन्-पर्त्तुगीज्-फरासी-इटाली-डच् प्रभृतिषु भाषासु तस्य पारदर्शिता आसीत् । असौ अद्वैतवादी दार्शनिकः उत्तमचरित्रवान् तथा ऋषितुल्य आसीत् । असौ महात्मा १६७७ खीष्टाब्दे फेब्रूयारीमासस्य एकविंशतितमे दिवसे क्षयरोगेणाक्रान्तः सन् (४५)पञ्चचत्वारिंशत्तमे वयसि पञ्चत्वं प्राप्तवान् ।

कृतयः-

समयानुसारं षड्पुस्तकानि तेन विलिखितानि । तानि तु वक्ष्माणानि-

1 - Cogitata .netaphysicsa

2 - Tractatus Theogico Politicus

3 - Ethica (Ethics)

4 - Tractus de Intellectus Emendatome Epistolac

5 - Correspondence

6 - Short Treatise(Treatises concerning God and Man)

स्पिनोजीयज्ञानमीमांसा-

अस्य दार्शनिकीपद्धतिः देकार्तदर्शनवत् प्रागानुभाविकी अवरोहात्मिका च आसीत् । अस्य दार्शनिकचिन्ताधारा "ज्यामितिकपद्धति" नाम्ना परिचिता दृश्यते । अस्मिन् विश्वे ज्ञानमीमांसाप्रसंगे सर्वैः विज्ञानवादिदार्शनिकैः व्यावहारिकपारमार्थिकरूपेण भेदः अंगीकृतः । तत्र सविकल्पकबुद्धेर्ज्ञानं व्यावहारिकं निर्विकल्पकानुभूतेर्ज्ञानं च पारमार्थिकमिति । व्यावहारिकं यज्ज्ञानं तत्तु भ्रमप्रमादादियुक्तं अज्ञानसम्बलितम् मित्याज्ञानम् । पारमार्थिकसाक्षात्कारेण यथार्थज्ञानं समुदेति । स्पिनोजामतेन ज्ञानं त्रिविधम् । १-

कल्पनाजन्यम् २-बौद्धिकम् ३-प्रज्ञाजन्यश्चेति । तत्राद्यं कल्पनाजन्यं तु इन्द्रियप्रत्यक्षैः विश्लेषणात्मकसविकल्पकबुद्ध्या हि जायते । पञ्चज्ञानेन्द्रियैः लब्धं बाह्यप्रत्यक्षलब्धं मनसा च प्राप्तं हर्षशोकक्रोधमोहात्मकमान्तरिक्षप्रत्यक्षं तु अस्मिन् ज्ञानेऽन्तर्भुक्तम् । द्वितीयं बौद्धिकं तर्कजन्यम् । अनेन वस्तुनिहितसाधारणधर्माणामाधारेण अवरोहक्रमेण सिद्धान्तः सम्भवति । इदं बौद्धिकज्ञानममूर्त्तमनुमानाश्रयि च । अनेन बौद्धिकज्ञानेन न केवलं वस्तूनां बाह्यस्वरूपकं ज्ञानं जन्यते अपि तु तेषां पारस्परिकं सम्बन्धविषयकं ज्ञानमपि सम्भवति । अन्तिमं प्रज्ञाजन्यज्ञानमपरोक्षानुभूतिर्निर्विकल्पकमिति वोच्यते । बौद्धिकज्ञानापेक्षया एतदुच्चतरमिति कथ्यते ।

बन्धमुक्तिविचारः-

स्पिनोजादर्शने बन्धमुक्तिविचारः स्वतन्त्रः । तन्नये अन्धकारात् आलोकप्राप्तिः, पराधीनतायाः स्वाधीनतालाभः, बन्धनान्मुक्तिरिति प्रसंगे विशेषो विमर्शः प्रतिफलितः । सर्वेषु वस्तुषु स्वस्य रक्षणप्रवृतिः वर्तते । यद्वशात् स स्वस्य स्थितौ तिष्ठति । सर्वेषु जीवमात्रेषु प्राणशक्तिर्वर्त्तमाना । इयं शक्तिर्बाह्यकारणात् नियन्त्रिता । तत्र स्पिनोजादर्शने भारतीयदर्शनवत् ज्ञानान्मुक्तिः अज्ञानाद् बन्ध इति स्वीक्रियते । भावनावशाद् हि अनित्यवस्तु प्रति अस्माकमनुराग उत्पद्यते । अनया भावनया हि भयद्वेषजुगुप्सादीनामुत्पतिर्जायते । एषा भावना सुखदुःखकामभेदेन त्रिधा विभक्ता । सुखेन कदाचित् पूर्णताप्राप्तिः, दुखेन शक्तिह्रासः, कामेन च वुभुक्षा जायते । मनसः निष्क्रियपरतन्त्रपराधीनवस्थायां बन्धः तथा तस्य स्वतन्त्रसक्रियस्वाधीनावस्थायां च मुक्तिर्जायते । बुद्धिमतो जनस्य कार्याणि आन्तरिकशक्त्या  एव नियन्त्रितानि भवन्ति न तु बाह्यशक्त्या । बुद्ध्या नियन्त्रितं जीवनं सक्रियं स्वाधीनं मुक्तश्चेति स्पिनोजादर्शनस्य सिद्धान्तः । बुद्धिजन्यज्ञानेन स्वस्य तात्विकसत्तायाः सुरक्षापूर्वकं स्वभावविकाशनेन परमपुरुषार्थसिद्धिः स्वस्मिन् परमात्मसत्तानुभूतिश्च  जायते । ईश्वर एव स्पष्टप्रत्ययः । मानव एवम्भूतस्य परमार्थस्थिते परिणतिरिति ।  आध्यात्मिकजीवनस्य लक्ष्यः परमेश्वरः । बौद्धिकजीवनयापनेन सक्रियभावावेगेन च मनुष्यः स्वस्मिन् ईश्वरसत्तामनुभवति । एवम्भूत आत्मोपलब्धिर्मुक्तिरिति संक्षेपः स्पिनोजाराद्धान्तः संकलितः ।

— लेखकः - नन्दप्रदीप्तकुमारः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः पुरी

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*About Benedict (Baruch) Spinoza*

pdf was typeset on June 27, 2022

Please send corrections to *sanskrit@cheerful.com*